# দ্বাদশস্তোত্রাণি শ্রীমধ্বকৃত

{॥ দ্বাদশস্তোত্রাণি শ্রীমধ্বকৃত ॥}

{hউগেদ্ব্র্গ্ ॥ দ্বাদশ স্তোত্রাণি॥}

{অথ প্রথমস্তোত্রম্}

বন্দে বন্দ্যং সদানন্দং বাসুদেবং নিরঞ্জনম্ ।

ইন্দিরাপতিমাদ্যাদি বরদেশ বরপ্রদম্ ॥ ১॥

নমামি নিখিলাধীশ কিরীটাঘৃষ্টপীঠবত্ ।

হৃত্তমঃ শমনেঽর্কাভং শ্রীপতেঃ পাদপঙ্কজম্ ॥ ২॥

জাম্বূনদাম্বরাধারং নিতম্বং চিন্ত্যমীশিতুঃ ।

স্বর্ণমঞ্জীরসংবীতং আরূঢং জগদম্বযা ॥ ৩॥

উদরং চিন্ত্যং ঈশস্য তনুত্বেঽপি অখিলম্ভরং ।

বলিত্রযাঙ্কিতং নিত্যং আরূঢং শ্রিযৈকযা ॥ ৪॥

স্মরণীযমুরো বিষ্ণোঃ ইন্দিরাবাসমুত্তমৈঃ । var

ইন্দিরাবাসমীশিতুঃ ইন্দিরাবাসমুত্তমম্

অনন্তং অন্তবদিব ভুজযোরন্তরঙ্গতম্ ॥ ৫॥

শঙ্খচক্রগদাপদ্মধরাশ্চিন্ত্যা হরের্ভুজাঃ ।

পীনবৃত্তা জগদ্রক্ষা কেবলোদ্যোগিনোঽনিশম্ ॥ ৬॥

সন্ততং চিন্তযেৎকণ্ঠং ভাস্বৎকৌস্তুভভাসকম্ ।

বৈকুণ্ঠস্যাখিলা বেদা উদ্গীর্যন্তেঽনিশং যতঃ ॥ ৭॥

স্মরেত যামিনীনাথ সহস্রামিতকান্তিমত্ ।

ভবতাপাপনোদীড্যং শ্রীপতেঃ মুখপঙ্কজম্ ॥ ৮॥

পূর্ণানন্যসুখোদ্ভাসিং অন্দস্মিতমধীশিতুঃ ।

গোবিন্দস্য সদা চিন্ত্যং নিত্যানন্দপদপ্রদম্ ॥ ৯॥

স্মরামি ভবসন্তাপ হানিদামৃতসাগরম্ ।

পূর্ণানন্দস্য রামস্য সানুরাগাবলোকনম্ ॥ ১০॥

ধ্যাযেদজস্রমীশস্য পদ্মজাদিপ্রতীক্ষিতম্ ।

ভ্রূভঙ্গং পারমেষ্ঠ্যাদি পদদাযি বিমুক্তিদম্ ॥ ১১॥

সন্ততং চিন্তযেঽনন্তং অন্তকালে var অন্ত্যকালে বিশেষতঃ ।

নৈবোদাপুঃ গৃণন্তোঽন্তং যদ্গুণানাং অজাদযঃ ॥ ১২॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু প্রথমস্তোত্রং সম্পূর্ণম্}

{অথ দ্বিতীযস্তোত্রম্}

স্বজনোদধিসংবৃদ্ধি পূর্ণচন্দ্রো গুণার্ণবঃ ।var সুজনোদধিসংবৃদ্ধি

অমন্দানন্দ সান্দ্রো নঃ সদাব্যাদিন্দিরাপতিঃ ॥ ১॥ var প্রীযাতামিন্দিরাপতিঃ

রমাচকোরীবিধবে দুষ্টদর্পোদবহ্নযে (দুষ্টসর্পোদবহ্নযে) ।

সৎপান্থজনগেহায নমো নারাযণায তে ॥ ২॥

চিদচিদ্ভেদং অখিলং বিধাযাধায ভুঞ্জতে ।

অব্যাকৃতগুহস্থায রমাপ্রণযিনে নমঃ ॥ ৩॥

অমন্দগুণসারোঽপি মন্দহাসেন বীক্ষিতঃ ।

নিত্যমিন্দিরযাঽনন্দসান্দ্রো যো নৌমি তং হরিম্ ॥ ৪॥

বশী বশো (বশে) ন কস্যাপি যোঽজিতো বিজিতাখিলঃ ।

সর্বকর্তা ন ক্রিযতে তং নমামি রমাপতিম্ ॥ ৫॥

অগুণাযগুণোদ্রেক স্বরূপাযাদিকারিণে ।

বিদারিতারিসঙ্ঘায বাসুদেবায তে নমঃ ॥ ৬॥

আদিদেবায দেবানাং পতযে সাদিতারযে ।

অনাদ্যজ্ঞানপারায নমঃ পারাবরাশ্রয ॥ ৭॥ var নমো বরবরায তে

অজায জনযিত্রেঽস্য বিজিতাখিলদানব ।

অজাদি পূজ্যপাদায নমস্তে গরুডধ্বজ ॥ ৮॥

ইন্দিরামন্দসান্দ্রাগ্র্য কটাক্ষপ্রেক্ষিতাত্মনে ।

অস্মদিষ্টৈক কার্যায পূর্ণায হরযে নমঃ ॥ ৯॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু দ্বিতীযস্তোত্রং সম্পূর্ণম্}

{অথ তৃতীযস্তোত্রম্}

কুরু ভুঙ্ক্ষ্ব চ কর্ম নিজং নিযতং হরিপাদবিনম্রধিযা সততং ।

হরিরেব পরো হরিরেব গুরুঃ হরিরেব জগৎপিতৃমাতৃগতিঃ ॥ ১॥

ন ততোঽস্ত্যপরং জগদীড্যতমং (জগতীড্যতমং) পরমাৎপরতঃ পুরুষোত্তমতঃ ।

তদলং বহুলোকবিচিন্তনযা প্রবণং কুরু মানসমীশপদে ॥ ২॥

যততোঽপি হরেঃ পদসংস্মরণে সকলং হ্যঘমাশু লযং ব্রজতি ।

স্মরতস্তু বিমুক্তিপদং পরমং স্ফুটমেষ্যতি তৎকিমপাক্রিযতে ॥ ৩॥

শৃণুতামলসত্যবচঃ পরমং শপথেরিতং উচ্ছ্রিতবাহুযুগং ।

ন হরেঃ পরমো ন হরেঃ সদৃশঃ পরমঃ স তু সর্ব চিদাত্মগণাত্ ॥ ৪॥

যদি নাম পরো ন ভবেত (ভবেৎস) হরিঃ কথমস্য বশে জগদেতদভূত্ ।

যদি নাম ন তস্য বশে সকলং কথমেব তু নিত্যসুখং ন ভবেত্ ॥ ৫॥

ন চ কর্মবিমামল কালগুণপ্রভৃতীশমচিত্তনু তদ্ধি যতঃ ।

চিদচিত্তনু সর্বমসৌ তু হরির্যমযেদিতি বৈদিকমস্তি বচঃ ॥ ৬॥

ব্যবহারভিদাঽপি গুরোর্জগতাং ন তু চিত্তগতা স হি চোদ্যপরম্ ।

বহবঃ পুরুষাঃ পুরুষপ্রবরো হরিরিত্যবদৎস্বযমেব হরিঃ ॥ ৭॥

চতুরানন পূর্ববিমুক্তগণা হরিমেত্য তু পূর্ববদেব সদা ।

নিযতোচ্চবিনীচতযৈব নিজাং স্থিতিমাপুরিতি স্ম পরং বচনম্ ॥ ৮॥

আনন্দতীর্থসন্নাম্না পূর্ণপ্রজ্ঞাভিধাযুজা ।

কৃতং হর্যষ্টকং ভক্ত্যা পঠতঃ প্রীযতে হরিঃ ॥ ৯॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু তৃতীযস্তোত্রং সম্পূর্ণম্}

{অথ চতুর্থস্তোত্রম্}

নিজপূর্ণসুখামিতবোধতনুঃ পরশক্তিরনন্তগুণঃ পরমঃ ।

অজরামরণঃ সকলার্তিহরঃ কমলাপতিরীড্যতমোঽবতু নঃ ॥ ১॥

যদসুপ্তিগতোঽপি হরিঃ সুখবান্ সুখরূপিণমাহুরতো নিগমাঃ ।
স্বমতিপ্রভবং জগদস্য যতঃ পরবোধতনুং চ ততঃ খপতিম্ ॥ ২॥ var সুমতিপ্রভবম্

বহুচিত্রজগত্ বহুধাকরণাৎপরশক্তিরনন্তগুণঃ পরমঃ ।
সুখরূপমমুষ্যপদং পরমং স্মরতস্তু ভবিষ্যতি তৎসততম্ ॥ ৩॥

স্মরণে হি পরেশিতুরস্য বিভোর্মলিনানি মনাংসি কুতঃ করণম্ ।
বিমলং হি পদং পরমং স্বরতং তরুণার্কসবর্ণমজস্য হরেঃ ॥ ৪॥

বিমলৈঃ শ্রুতিশাণনিশাততমৈঃ সুমনোঽসিভিরাশু নিহত্য দৃঢম্ ।
বলিনং নিজবৈরিণমাত্মতমোভিদমীশমনন্তমুপাস্ব হরিম্ ॥ ৫॥

ন হি বিশ্বসৃজো বিভুশম্ভুপুরন্দর সূর্যমুখানপরানপরান্ ।
সৃজতীড্যতমোঽবতি হন্তি নিজং পদমাপযতি প্রণতাং স্বধিযা ॥ ৬॥

পরমোঽপি রমেশিতুরস্য সমো ন হি কশ্চিদভূন্ন ভবিষ্যতি চ ।
ক্বচিদদ্যতনোঽপি ন পূর্ণসদাগণিতেড্যগুণানুভবৈকতনোঃ ॥ ৭॥

ইতি দেববরস্য হরেঃ স্তবনং কৃতবান্ মুনিরুত্তমমাদরতঃ ।
সুখতীর্থপদাভিহিতঃ পঠতস্তদিদং ভবতি ধ্রুবমুচ্চসুখম্ ॥ ৮॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু চতুর্থস্তোত্রং সম্পূর্ণম্}

{অথ পঞ্চমস্তোত্রম্}

বাসুদেবাপরিমেযসুধামন্ শুদ্ধসদোদিত সুন্দরীকান্ত ।

ধরাধরধারণ বেধুরধর্তঃ সৌধৃতিদীধিতিবেধৃবিধাতঃ ॥ ১॥

অধিকবন্ধং রন্ধয বোধা চ্ছিন্ধিপিধানং বন্ধুরমদ্ধা ।

কেশব কেশব শাসক বন্দে পাশধরার্চিত শূরপরেশ (শূরবরেশ) ॥ ২॥

নারাযণামলতারণ (কারণ) বন্দে কারণকারণ পূর্ণ বরেণ্য ।

মাধব মাধব সাধক বন্দে বাধক বোধক শুদ্ধ সমাধে ॥ ৩॥

গোবিন্দ গোবিন্দ পুরন্দর বন্দে স্কন্দ সনন্দন বন্দিত পাদ ।

বিষ্ণু সৃজিষ্ণু গ্রসিষ্ণু বিবন্দে কৃষ্ণ সদুষ্ণ বধিষ্ণ সুধৃষ্ণো ॥ ৪॥

var বিষ্ণো সৃজিষ্ণো গ্রসিষ্ণো বিবন্দে কৃষ্ণ সদুষ্ণবধিষ্ণো সুধৃষ্ণো

মধুসূদন দানবসাদন বন্দে দৈবতমোদন (দৈবতমোদিত) বেদিত পাদ ।

ত্রিবিক্রম নিষ্ক্রম বিক্রম বন্দে সুক্রম সঙ্ক্রমহুঙ্কৃতবক্ত্র ॥ ৫॥ var সঙ্ক্রম সুক্রম হুঙ্কৃতবক্ত্র

বামন বামন ভামন বন্দে সামন সীমন সামন সানো ।

শ্রীধর শ্রীধর শংধর বন্দে ভূধর বার্ধর কন্ধরধারিন্ ॥ ৬॥

হৃষীকেশ সুকেশ পরেশ বিবন্দে শরণেশ কলেশ বলেশ সুখেশ ।

পদ্মনাভ শুভোদ্ভব বন্দে সম্ভৃতলোকভরাভর ভূরে ।

দামোদর দূরতরান্তর বন্দে দারিতপারক পার (দারিতপারগপার) পরস্মাত্ ॥ ৭॥

আনন্দসুতীর্থ মুনীন্দ্রকৃতা হরিগীতিরিযং পরমাদরতঃ ।

পরলোকবিলোকন সূর্যনিভা হরিভক্তি বিবর্ধন শৌণ্ডতমা ॥ ৮॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু পঞ্চমস্তোত্রং সম্পূর্ণম্}

{অথ ষষ্ঠস্তোত্রম্}

মৎস্যকরূপ লযোদবিহারিন্ বেদবিনেত্র চতুর্মুখবন্দ্য ।

কূর্মস্বরূপক মন্দরধারিন্ লোকবিধারক দেববরেণ্য ॥ ১॥

সূকররূপক দানবশত্রো ভূমিবিধারক যজ্ঞাবরাঙ্গ ।

দেব নৃসিংহ হিরণ্যকশত্রো সর্ব ভযান্তক দৈবতবন্ধো ॥ ২॥

বামন বামন মাণববেষ দৈত্যবরান্তক কারণরূপ ।

রাম ভৃগূদ্বহ সূর্জিতদীপ্তে ক্ষত্রকুলান্তক শম্ভুবরেণ্য ॥ ৩॥

রাঘব রাঘব রাক্ষস শত্রো মারুতিবল্লভ জানকিকান্ত ।

দেবকিনন্দন নন্দকুমার বৃন্দাবনাঞ্চন গোকুলচন্দ্র ॥ ৪॥

কন্দফলাশন সুন্দররূপ নন্দিতগোকুলবন্দিতপাদ ।

ইন্দ্রসুতাবক নন্দকহস্ত চন্দনচর্চিত সুন্দরিনাথ ॥ ৫॥

ইন্দীবরোদর দলনয়ন মন্দরধারিন্ গোবিন্দ বন্দে ।

চন্দ্রশতানন কুন্দসুহাস নন্দিতদৈবতানন্দসুপূর্ণ ॥ ৬॥

দেবকিনন্দন সুন্দররূপ রুক্মিণিবল্লভ পাণ্ডববন্ধো ।

দৈত্যবিমোহক নিত্যসুখাদে দেববিবোধক বুদ্ধস্বরূপ ॥ ৭॥

দুষ্টকুলান্তক কল্কিস্বরূপ ধর্মবিবর্ধন মূলযুগাদে ।

নারায়ণামলকারণমূর্তে পূর্ণগুণার্ণব নিত্যসুবোধ ॥ ৮॥

আনন্দতীর্থকৃতা হরিগাথা পাপহরা শুভনিত্যসুখার্থা ॥ ৯॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু ষষ্ঠস্তোত্রং সম্পূর্ণম্}

{অথ সপ্তমস্তোত্রম্}

বিশ্বস্থিতিপ্রলয়সর্গমহাবিভূতি বৃত্তিপ্রকাশনিয়মাবৃতি বন্ধমোক্ষাঃ ।

যস্যা অপাঙ্গলবমাত্রত ঊর্জিতা সা শ্রীঃ যৎকটাক্ষবলবত্যজিতং নমামি ॥ ১॥

ব্রহ্মেশশক্ররবিধর্মশশাঙ্কপূর্ব গীর্বাণসন্ততিরিয়ং যদপাঙ্গলেশম্ ।

আশ্রিত্য বিশ্ববিজযং বিসৃজত্যচিন্ত্যা শ্রীঃ যৎকটাক্ষবলবত্যজিতং নমামি ॥ ২॥

ধর্মার্থকামসুমতিপ্রচযাদ্যশেষসন্মঙ্গলং বিদধতে যদপাঙ্গলেশম্ ।

আশ্রিত্য তৎপ্রণতসৎপ্রণতা অপীড্যা শ্রীঃ যৎকটাক্ষবলবতি অজিতং নমামি ॥ ৩॥

ষড্বর্গনিগ্রহনিরস্তসমস্তদোষা ধ্যাযন্তি বিষ্ণুমৃষযো যদপাঙ্গলেশম্ ।

আশ্রিত্য যানপি সমেত্য ন যাতি দুঃখং শ্রীঃ যৎকটাক্ষবলবতি অজিতং নমামি ॥ ৪॥

শেষাহিবৈরিশিবশক্রমনুপ্রধান চিত্রোরুকর্মরচনং যদপাঙ্গলেশম্ ।

আশ্রিত্য বিশ্বমখিলং বিদধাতি ধাতা শ্রীঃ যৎকটাক্ষবলবতি অজিতং নমামি ॥ ৫॥

শক্রোগ্রদীধিতিহিমাকরসূর্যসূনু পূর্বং নিহত্য নিখিলং যদপাঙ্গলেশম্ ।

আশ্রিত্য নৃত্যতি শিবঃ প্রকটোরুশক্তিঃ শ্রীঃ যৎকটাক্ষ বলবতি অজিতং নমামি ॥ ৬॥

তৎপাদপঙ্কজমহাসনতামবাপ শর্বাদিবন্দ্যচরণো যদপাঙ্গলেশম্ ।

আশ্রিত্য নাগপতিঃ অন্যসুরৈর্দুরাপাং শ্রীঃ যৎকটাক্ষবলবতি অজিতং নমামি ॥ ৭॥

নাগারিরুগ্রবলপৌরুষ আপ বিষ্ণুবাহত্বমুত্তমজবো যদপাঙ্গলেশম্ । var

বিষ্ণোর্বাহ

আশ্রিত্য শক্রমুখদেবগণৈঃ অচিন্ত্যং শ্রীঃ যৎকটাক্ষ বলবতি অজিতং নমামি ॥ ৮॥

আনন্দতীর্থমুনিসন্মুখপংকজোত্থং সাক্ষাদ্রমাহরিমনঃ প্রিযং উত্তমার্থম্ ।

ভক্ত্যা পঠতি অজিতমাত্মনি সন্নিধায যঃ স্তোত্রমেতভিযাতি তযোরভীষ্টম্ ॥ ৯॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু সপ্তমস্তোত্রং সম্পূর্ণম্}

{অথ অষ্টমস্তোত্রম্}

বন্দিতাশেষবন্দ্যোরুবৃন্দারকং চন্দনাচর্চিতোদারপীনাংসকম্ ।

ইন্দিরাচঞ্চলাপাঙ্গনীরাজিতং মন্দরোদ্ধারিবৃত্তোদ্ভুজাভোগিনম্ ।

প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ১॥

সৃষ্টিসংহারলীলাবিলাসাততং পুষ্টষাড্গুণ্যসদ্বিগ্রহোল্লাসিনম্ ।

দুষ্টনিঃশেষসংহারকর্মোদ্যতং হৃষ্টপুষ্টাতিশিষ্ট (অনুশিষ্ট) প্রজাসংশ্রযম্ ।

প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ২॥

উন্নতপ্রার্থিতাশেষসংসাধকং সন্নতালৌকিকানন্দদশ্রীপদম্ ।

ভিন্নকর্মাশযপ্রাণিসম্প্রেরকং তন্ন কিং নেতি বিদ্বৎসু মীমাংসিতম্ ।

প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ৩॥

বিপ্রমুখ্যৈঃ সদা বেদবাদোন্মুখৈঃ সুপ্রতাপৈঃ ক্ষিতীশেশ্বরৈশ্চার্চ্চিতম্ ।

অপ্রতর্ক্যোরুসংবিদ্গুণং নির্মলং সপ্রকাশাজরানন্দরূপং পরম্ ।

প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ৪॥

অত্যযো যস্য (যেন) কেনাপি ন ক্বাপি হি প্রত্যযো যদ্গুণেষূত্তমানাং পরঃ ।
সত্যসঙ্কল্প একো বরেণ্যো বশী মত্যনূনৈঃ সদা বেদবাদোদিতঃ ।
প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ৫॥

পশ্যতাং দুঃখসন্তাননির্মূলনং দৃশ্যতাং দৃশ্যতামিত্যজেশার্চিতম্ ।
নশ্যতাং দূরগং সর্বদাপ্যাঽত্মগং বশ্যতাং স্বেচ্ছযা সজ্জনেষ্বাগতম্ ।
প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ৬॥

অগ্রজং যঃ সসর্জাজমগ্র্যাকৃতিং বিগ্রহো যস্য সর্বে গুণা এব হি ।
উগ্র আদ্যোঽপি যস্যাত্মজাগ্র্যাত্মজঃ সদ্গৃহীতঃ সদা যঃ পরং দৈবতম্ ।
প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ৭॥

অচ্যুতো যো গুণৈর্নিত্যমেবাখিলৈঃ প্রচ্যুতোঽশেষদোষৈঃ সদা পূর্তিতঃ ।
উচ্যতে সর্ববেদোরুবাদৈরজঃ স্বর্চিতো ব্রহ্মরুদ্রেন্দ্রপূর্বৈঃ সদা ।
প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ৮॥

ধার্যতে যেন বিশ্বং সদাজাদিকং বার্যতেঽশেষদুঃখং নিজধ্যাযিনাম্ ।
পার্যতে সর্বমন্যৈর্নযৎপার্যতে কার্যতে চাখিলং সর্বভূতৈঃ সদা ।
প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ৯॥

সর্বপাপানিযৎসংস্মৃতেঃ সঙ্ক্ষযং সর্বদা যান্তি ভক্ত্যা বিশুদ্ধাত্মনাম্ ।
শর্বগুর্বাদিগীর্বাণ সংস্থানদঃ কুর্বতে কর্ম যৎপ্রীতযে সজ্জনাঃ ।

প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ১০॥

অক্ষযং কর্ম যস্মিন্ পরে স্বর্পিতং প্রক্ষযং যান্তি দুঃখানি যন্নামতঃ ।
অক্ষরো যোঽজরঃ সর্বদৈবামৃতঃ কুক্ষিগং যস্য বিশ্বং সদাঽজাদিকম্ ।
প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ১১॥

নন্দিতীর্থোরুসন্নামিনো নন্দিনঃ সন্দধানাঃ সদানন্দদেবে মতিম্ ।
মন্দহাসারুণা পাঙ্গদত্তোন্নতিং বন্দিতাশেষদেবাদিবৃন্দং সদা ।
প্রীণযামো বাসুদেবং দেবতামণ্ডলাখণ্ডমণ্ডনং প্রীণযামো বাসুদেবম্ ॥ ১২॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}
{দ্বাদশস্তোত্রেষু অষ্টমস্তোত্রং সম্পূর্ণম্}

{অথ নবমস্তোত্রম্}
অতিমততমোগিরিসমিতিবিভেদন পিতামহভূতিদ গুণগণনিলয ।
শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ১॥

বিধিভবমুখসুরসততসুবন্দিতরমামনোবল্লভ ভব মম শরণম্ ।
শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ২॥

অগণিতগুণগণমযশরীর হে বিগতগুণেতর ভব মম শরণম্ ।
শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ৩॥

অপরিমিতসুখনিধিবিমলসুদেহ হে বিগত সুখেতর ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ৪॥

প্রচলিতলযজলবিহরণ শাশ্বতসুখমযমীন হে ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ৫॥

সুরদিতিজসুবলবিলুঽিতমন্দরধর পর কূর্ম হে ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ৬॥

সগিরিবরধরাতঽবহ সুসূকরপরমবিবোধ হে ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ৭॥

অতিবলদিতিসুত হৃদয বিভেদন জযনৃহরেঽমল ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ৮॥

বলিমুখদিতিসুতবিজযবিনাশন জগদবনাজিত ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ৯॥

অবিজিতকুনৃপতিসমিতিবিখণ্ডন রমাবর বীরপ ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ১০॥

খরতরনিশিচরদহন পরামৃত রঘুবর মানদ ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ১১॥

সুললিততনুবর বরদ মহাবল যদুবর পার্থপ ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ১২॥

দিতিসুতবিমোহন বিমলবিবোধন পরগুণবুদ্ধ হে ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ১৩॥

কলিমলহুতবহ সুভগ মহোৎসব শরণদ কল্কীশ ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ১৪॥

অখিলজনিবিলয পরসুখকারণ পরপুরুষোত্তম ভব মম শরণম্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ১৫॥

ইতি তব নুতিবরসততরতের্ভব সুশরণমুরুসুখতীর্থমুনেঃ ভগবন্ ।

শুভতম কথাশয পরমসদোদিত জগদেককারণ রামরমারমণ ॥ ১৬॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু নবমস্তোত্রং সম্পূর্ণম্}

{অথ দশমস্তোত্রম্}

অব নঃ শ্রীপতিরপ্রতিরধিকেশাদিভবাদে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১॥

সুরবন্দ্যাধিপ সদ্বরভরিতাশেষগুণালম্ ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ২॥

সকলধ্বান্তবিনাশন (বিনাশক) পরমানন্দসুধাহো ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ৩॥

ত্রিজগৎপোত সদার্চিতচরণাশাপতিধাতো ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ৪॥

ত্রিগুণাতীতবিধারক পরিতো দেহি সুভক্তিম্ ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ৫॥

শরণং কারণভাবন ভব মে তাত সদাঽলম্ ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ৬॥

মরণপ্রাণদ পালক জগদীশাব সুভক্তিম্ ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ৭॥

তরুণাদিত্যসবর্ণকচরণাব্জামল কীর্তে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ৮॥

সলিলপ্রোত্থসরাগকমণিবর্ণোচ্চনখাদে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ৯॥

কজ (খজ) তূণীনিভপাবনবরজঙ্ঘামিতশক্তে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১০॥

ইবহস্তপ্রভশোভনপরমোরুস্থরমাঌে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১১॥

অসনোৎফুল্লসুপুষ্পকসমবর্ণাবরণান্তে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১২॥

শতমোদোদ্ভবসুন্দরিবরপদ্মোত্থিতনাভে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১৩॥

জগদাগূহকপল্লবসমকুক্ষে শরণাদে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১৪॥

জগদম্বামলসুন্দরিগৃহবক্ষোবর যোগিন্ ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১৫॥

দিতিজান্তপ্রদ চক্রধরগদাযুগ্বরবাহো ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১৬॥

পরমজ্ঞানমহানিধিবদন শ্রীরমণেন্দো ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১৭॥

নিখিলাঘৌঘবিনাশন (বিনাশক) পরসৌখ্যপ্রদদৃষ্টে ।

করুণাপূর্ণবরপ্রদচরিতং জ্ঞাপয মে তে ॥ ১৮॥

পরমানন্দসুতীর্থসুমুনিরাজো হরিগাথাম্ ।

কৃতবান্নিত্যসুপূর্ণকপরমানন্দপদৈষিন্ ॥ ১৯॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু দশমস্তোত্রং সম্পূর্ণম্}

{অথ একাদশস্তোত্রম্}

উদীর্ণমজরং দিব্যং অমৃতস্যন্দ্যধীশিতুঃ ।

আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদি অভিবন্দিতম্ ॥ ১॥

সর্ববেদপদোদ্গীতং ইন্দিরাবাসমুত্তমম্ (ইন্দিরাধারমুত্তমম্) ।

আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদি অভিবন্দিতম্ ॥ ২॥

সর্বদেবাদিদেবস্য বিদারিতমহত্তমঃ ।

আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদি অভিবন্দিতম্ ॥ ৩॥

উদারমাদরান্নিত্যং অনিন্দ্যং সুন্দরীপতেঃ ।

আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদি অভিবন্দিতম্ ॥ ৪॥

ইন্দীবরোদরনিভং সুপূর্ণং বাদিমোহনম্ (বাদিমোহদম্) ।

আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদি অভিবন্দিতম্ ॥ ৫॥

দাতৃসর্বামরৈশ্বর্যবিমুক্ত্যাদেরহো পরম্ (বরম্) ।

আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদি অভিবন্দিতম্ ॥ ৬॥

দূরাদ্দুরতরং যত্তু তদেবান্তিকমন্তিকাত্ ।

আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদি অভিবন্দিতম্ ॥ ৭॥

পূর্ণসর্বগুণৈকার্ণমনাদ্যন্তং সুরেশিতুঃ ।

আনন্দস্য পদং বন্দে ব্রহ্মেন্দ্রাদি অভিবন্দিতম্ ॥ ৮॥

আনন্দতীর্থমুনিনা হরেরানন্দরূপিণঃ ।

কৃতং স্তোত্রমিদং পুণ্যং পঠন্নানন্দমাপ্নুযাত্ ॥ ৯॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু একাদশস্তোত্রং সম্পূর্ণম্}

{অথ দ্বাদশস্তোত্রম্}

আনন্দমুকুন্দ অরবিন্দনযন ।

আনন্দতীর্থ পরানন্দবরদ ॥ ১॥

সুন্দরীমন্দিরগোবিন্দ বন্দে ।

আনন্দতীর্থ পরানন্দবরদ ॥ ২॥

চন্দ্রকমন্দিরনন্দক বন্দে ।

আনন্দতীর্থ পরানন্দবরদ ॥ ৩॥

চন্দ্রসুরেন্দ্রসুবন্দিত বন্দে ।

আনন্দতীর্থ পরানন্দবরদ ॥ ৪॥

মন্দারসূনসুচর্চিত বন্দে ।

আনন্দতীর্থ পরানন্দবরদ ॥ ৫॥

বৃন্দারবৃন্দসুবন্দিত বন্দে (বৃন্দারকবৃন্দসুবন্দিত বন্দে) ।

আনন্দতীর্থ পরানন্দবরদ ॥ ৬॥

ইন্দিরাঽনন্দক সুন্দর বন্দে ।

আনন্দতীর্থ পরানন্দবরদ ॥ ৭॥

মন্দিরস্যন্দনস্যন্দক বন্দে ।

আনন্দতীর্থ পরানন্দবরদ ॥ ৮॥

আনন্দচন্দ্রিকাস্যন্দক বন্দে ।

আনন্দতীর্থ পরানন্দবরদ ॥ ৯॥

{ইতি শ্রীমদানন্দতীর্থভগবৎপাদাচার্য বিরচিতং}

{দ্বাদশস্তোত্রেষু দ্বাদশং স্তোত্রং সম্পূর্ণম্}

{॥ ভারতীরমণমুখ্যপ্রাণান্তর্গত শ্রীকৃষ্ণার্পণমস্তু ॥}

Encoded by Shrisha Rao (shrao@dvaita.org)

Proofread by Meera Tadipatri(mtadipatri@dvaita.net)

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Dashavatara Stotram 3 ( By Madhvacharya ) Lyrics in Bengali PDF
% File name : dvAdasha_stotra.itx
% Location : doc_vishhnu
% Author : Srimad Ananda Tiirtha, also known as Sri Madhva
% Language : Sanskrit
% Subject : Vishnu
% Transliterated by : Shrisha Rao
% Proofread by : "Meera Tadipatri"
% Latest update : June 18, 2000 (First encoded May 22, 1996)
% Send corrections to : Sanskrit@cheerful.com,shrao@dvaita.org,or info@dvaita.org
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website